श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री बालकृष्णाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री बालकृष्णाष्टकम् ॥

लीलया कुचेलमौलिपालितं कृपाकरं
नीललीलमिन्द्रनीलनीलकान्तिमोहनम्।
बालनीलचारुकोमलालकं विलासगो -
पालबालचारचोर बालकृष्णमाश्रये ॥ 1 ॥

इन्दुकुन्दमन्दहासमिन्दिराधराधरं
नन्दगोपनन्दनं सनन्दनादिवन्दितम्।
नन्दगोधनं सुरारिमर्दनं समस्तगो -
पालबालचारचोर बालकृष्णमाश्रये ॥ 2 ॥

वारिहारहीरचारुकीर्तितं विराजितं
द्वारकाविहारमम्बुजादिसूर्यलोचनम्।
भूरिमेरुधीरमादिकारणं सुसेव्यगो -
पालबालचारचोर बालकृष्णमाश्रये ॥ 3 ॥

शेषभोगशायिनं विशेषभूषणोज्ज्वलं
घोषमानकिङ्किणिं विभीषणादिपोषणम्।
शोषणाकृताम्बुधिं विभीषणार्चिताङ्घ्रिगो -
पालबालचारचोर बालकृष्णमाश्रये ॥ 4 ॥

पण्डिताखिलस्तुतं सुपुण्डरीकभास्वरं
कुण्डलप्रभासमानतुण्डगण्डमण्डलम्।

पुण्डरीकसन्नुतं जगन्नुतं मनोज्ञगो -
पालबालचारचोर बालकृष्णमाश्रये ॥ 5 ॥

आञ्जनेयमुख्यपालवानरेन्द्रकृन्तनं
कुञ्जरारिभञ्जनं निरञ्जनं शुभाकरम्।
मञ्जुकञ्जपत्रनेत्रराजितं विराजिगो -
पालबालचारचोर बालकृष्णमाश्रये ॥ 6 ॥

रामणीययज्ञधाम भामिनीवरप्रदं
सन्मनोहरं गुणाभिराममुन्नतं गुरुम्।
सामगानवेणुनादलोलमज्जितात्मगो -
पालबालचारचोर बालकृष्णमाश्रये ॥ 7 ॥

रङ्गदिन्दिराङ्गमङ्गलाङ्गशौर्यभासदा
सङ्गदासुरोत्तमाङ्गभङ्गकप्रदायकम्।
तुङ्गवैरवाभिराममङ्गलामृतात्मगो -
पालबालचारचोर बालकृष्णमाश्रये ॥ 8 ॥

बालकृष्णपुण्यनामलालितं शुभाष्टकं
ये पठन्ति सात्त्विकोत्तमा सदा मुदाच्युतम्।
राजमानपुत्रसम्पदादिशोभनानि ते
साधयन्ति विष्णुलोकमव्ययं नराश्च ते ॥ 9 ॥

॥ इति श्री बालकृष्णाष्टं समाप्तम् ॥